# संस्कृत वार्ता:

दिनाङ्क : 09/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- असम-केरल- पुद्दुचेरी प्रदेशेषु विधानसभा-निर्वाचनाय मतदानम् अद्य सम्पन्नम्।
- प्रधानमंत्री नरेन्द्रमोदी प्रोक्तवान् यत् विधानमडण्ले महिलाभ्य: आरक्षणं भारतीय – लोकतन्त्राय अति महत्वपूर्णम् ।
- शासनेन गृहोपयोगाय एलपीजी इत्यादीनां शत- प्रतिशन्मिता आपूर्ति: सुनिश्चिीकृता।
- एशिया- मुष्टामुष्टि- चैम्पियनशिप- द्वन्द्वे अद्य त्रीणि सर्व्णपदकानि एकं रजतपदकं च विजितम्।

---------------------------------------------------

<u>पीएम- महिला आरक्षण</u>

प्रधानमंत्री नरेन्द्र मोदी प्रोक्तवान् यत् विधानमडण्ले महिलाभ्य: आरक्षणं भारतीय – लोकतन्त्राय अति महत्वपूर्णम् ।

स्वीय- सम्पादकीयै स्वविचारान् प्रकटयन् श्री मोदी समुदीरितवान् यत् एतस्य आरक्षणस्य प्रर्वतने विलम्ब: दुर्भाग्यपूर्ण: स्यात्। एकं दृश्यश्रव्य चित्रं विनिमयी कुर्वन् प्रधानमंत्री प्रोक्तवान् यत् महिलाभ्य: सम्बद्धे महत्वपूर्ण विधेयके चर्चायै अथ पारितकरणाय संसद: सत्रं मासस्य अस्य षोडशे दिनांके समाहूतं वर्तते।

प्रधानमंत्री महिलानां योगदानं प्रकटयन् प्रोक्तवान् यत् विज्ञानं प्रविधि:, उद्यमिता, सशस्त्रबलानि, सङ्गीतं, कला, सर्वत्र महिलानां अग्रणी भूमिका वर्तते। प्रधानमंत्री प्रोक्तवान् यत् यदा महिला: प्रशासने सक्रिय भमिकां निर्वाहयन्ति।

---------------------------------------------------

## विधानसभा-निर्वाचनं

असम-केरल- पुद्दुचेरी इत्यत्र विधानसभा-निर्वाचनाय मतदानम् अद्य सम्पन्नम्। असम-प्रदेशे षड्विंशत्युत्तर-शतं-आसन्देभ्य:, केरल- प्रदेशे चत्वारिंशद्दुत्तर –शतम्-आसन्देभय: पुद्दुचेरी-केन्द्रशासित प्रदेशे च विंशत्- आसन्देभ्य: यतदानम् अन्ध सम्पन्नम् । निर्वाचायोगेन स्वतन्त्र-निष्पक्ष- शान्तिपूर्ण मतदान- सुनिश्चितीकरणदिशि सुदृढ सुरक्षा-व्यवस्था कृता।

नागालैंड इत्यत्र कोरिडांग- विधानसभा-उपनिर्वाचने त्रिंशत्-आसन्देभय:मतदानम् अद्य सम्पनम्। अपरत्र पश्चिम-बंगाले प्रथम-चरणस्य मतदानाय नामांकनाय अन्तिमा तिथि: अद्य। असम-केरल-तमिलनाडु-पश्चिम-बंगाल- पुद्दुचेरी- इत्येतेषु प्रदेशेषु मतगणना मे मासस्य चतुर्थे दिनांके भविष्यति।

---------------------------------------------------

## पीएम-पश्चिम- बंगाल

भाजपादलस्य वरिष्ठो नरेन्द्र मोदी अद्य प्रोक्तवान् यत् पश्चिम बंगाले भाजपादलस्य शासनं कृषकाणां कल्याणाय प्रतिबद्धम्। पश्चिम बंगालस्य हल्दिया- स्थले जनसभां सम्बोधनयन् श्री मोदी समुदीरितवान् यत् विधानसभा – निर्वाचनानन्तरं भाजपादलस्य शासने कृषकेभ्य: बहुलाभो भविष्यति, इति निश्चितम् ।

अपरत्र तृणमल कांग्रेस दलस्य प्रमुखा ममता बनर्जी अद्य उत्तर –परगना- जनपदस्य मीनाखान-स्थले एकां जनासभां सम्बोधितवती।

---------------------------------------------------

## विदेश सचिव: विक्रममिसरी

विदेश सचिव: विक्रममिसरी अद्य अमेरिकाया: ‘वाशिंगटन’ अत्यत्र अधिग्रहण- सम्बद्ध चर्चायै रक्षा- उपसचिवेन **माइकल पी. डफी** इत्यमुना मेलनं कृतवान्। विदेशमन्त्रालयस्य

प्रवक्ता रणधीर जायसवाल: संचारतन्त्र पटले विज्ञापितवान् यत् एतस्य उपवेशनस्य उद्देश्यं भारत-अमेरिका- देशयो: प्रमुख- सहभागित्वस्य सम्वर्द्धनं वर्तते।

---------------------------------------------------

## सूचना -विभाग

भारत- शासनेन पाकिस्तान – द्वारा प्रसारिताया: तस्या: सूचनाया: खण्डनं कृतं यत्र प्रसारितमासीत् यत् गुजरात- स्थेन भारतीय- वायुसैन्य द्वारा इजरायल- विमानानि साहाय्यप्रदत्तानि आसन्। सूचना-ब्यूरो-इत्येत द्वारा स्पष्टीकृतं यत् एतत् तथ्यं पूर्णतया भ्रामकम् ।

---------------------------------------------------

## भारतीय सैन्य- बलानि

भारतीय सैन्य- बलानां त्रिशक्ति कोरेण - उत्तरी सिक्किम क्षेत्रस्य लाचेन- इत्यत्र भूस्खलन- दुष्प्रभावितानां साहाय्यै हिमसेतु-अभियानं समारब्धम् । भूस्खलन कारणेन उत्तरी – सिक्किममस्य लाचेन- चुंगधांग- इत्युभययो: मध्ये सम्पर्क: बाधित: येन क्षेत्रे आवागमनं दुष्प्रभावितम्। साम्प्रतं यावत् पञ्चाशदधिकशतं पर्यटका: सुरक्षितरूपेण निष्कासिता: सन्ति।

---------------------------------------------------

## कृषि राज्यमन्त्री

कृषिराज्यमन्त्री कृषक- कल्याणमन्त्री च भारीरथ: चौधरी अद्य देशस्य कृषि- परिदृश्ये परितर्वनाय कृषाकाणं आय-सम्वर्द्धनाय कृषिकारिताया: महत्वे बलं दत्तवान्। नवदेहल्यां समायोजितं भारत-कृषिकारिता- शिखर-सम्मेलनं सम्बोधयन् श्री चौधरी प्रोक्तवान् यत् कृषि- क्षेत्रं सम्प्रति सुदृढं दरीदृश्यते , यच्च ग्रामणी- आजीविकायै राष्ट्रीय – खाद्य- सुरक्षायै सुदृढं आधारं प्रददाति।

---------------------------------------------------

## पश्चिम –एशिया संङ्कटं

पश्चिम –एशिया संङ्कटे नवदेहल्यां समायोजिते अन्तर-मन्त्रालयीय- वर्ताहर- मेलने स्पष्टीकृतं यत् सङ्कट कारणेन वैश्विक- आपूर्ति- श्रृखलानां व्यवधानानन्तरमपि औषधीनां तत्सम्बद्ध उत्पादानां मूल्येषु न महती वृद्धि: जाता। पैट्रोलियम प्राकृतिक वातीन्धन मन्त्रालयस्य संयुक्त- सचिव- पदासीना सुजाता शर्मा विज्ञापितवती यत् शासने गृहोपयोगाय एलपीजी इत्यादीनां शत- प्रतिशन्मिता आपूर्ति: सुनिश्चिीकृता। अग्रे प्रोक्तवती यत् देशे पर्याप्तं भण्डारं समुपलब्धम्, न तत्र कापि समस्या।

---------------------------------------------------

## एशिया- मुष्टामुष्टि- चैम्पियनशिप

मंगोलिया- इत्यत्र समायोज्यमाने एशिया- मुष्टामुष्टि- चैम्पियनशिप- द्वन्द्वे अद्य त्रीणि सर्वणपदकानि एकं रजतपदकं च विजित्य भारतीय- महिला- मुष्टामुष्टि- क्रीडिकाभि: उत्कृष्टं प्रदर्शनं कृतम्।

---------------------------------------------------

## बैडमिन्टन- एशिया- चैम्पियनशिप

बैडमिन्टन- एशिया- चैम्पियनशिप- प्रतिस्पर्धायां आयुष-शेट्टी इत्यसौ इत्येतेन पुरूषेकलवर्गस्य प्रागुपान्त्यक्रं प्राविशत्। तेन ची यू- जेन-इत्येतं एकविंशति: -षोडश, एकविंशाति: - द्वादश-इत्यन्तरालै: पराजितम्।

।। इति वार्ता: ।।